# संस्कृत वार्ताः

**दिनाङ्क : 17/05/2026** **सायम् - 06:20**

## आदौ मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी स्वीडन्-देशस्य द्विदिवसीय यात्रायाम् गोथेन्बर्ग्-नगरं संप्राप्तवान्; सः स्वीडन्-देशस्य प्रधानमन्त्रिणा उल्फ् क्रिस्टर्सन् इत्यनेन सह व्यापार-हरितपरिवर्तन-ए.आई. तथा रक्षाक्षेत्रेषु सहकारस्य समीक्षायै वार्तालापं करिष्यति।
- भारत-नीदरलैन्ड्स्-देशौ द्वैपाक्षिकसम्बन्धः सामरिकसहभागित्वेन वर्धितवन्तौ। प्रमुखेषु क्षेत्रेषु सहयोगं सुदृढं कर्तुं सप्तदश-सन्धि पत्रेषु हस्ताक्षरितवन्तौ।
- होर्मुज़्-जलसंधौ वाणिज्यिक-नौकायानस्य उपरि आक्रमणानि अस्वीकार्यानि इति भारतेन निन्दितम्।
- कांगो-युगाण्डा-देशयोः इबोला-प्रकोपः अन्ताराष्ट्रिय-चिन्तायाः सार्वजनिक-स्वास्थ्य-आपत्कालेति विश्व-स्वास्थ्य-सङ्घटनेन घोषितम्।
- बैड्मिण्टन्-क्रीडायां भारतस्य श्रेयांशी वालिशेट्टी इत्येषा बावोजी-चाईना-मास्टर्स्- स्पर्धायां महिला-एकल-क्रीडायां रजतपदकं विजितवती।

## अथ वार्ताः विस्तरेण

### प्रधानमंत्री-स्वीडन

भारतस्य प्रधानमन्त्री नरेन्द्रमोदी गोथेनबर्ग-नगरं प्राप्तवान्। नीदरलैण्डदेशस्य स्वीयां यात्रां समाप्य असौ अद्य सायंकाले स्वस्य पञ्चदेशानां यात्रायाः तृतीयचरणे स्वीडनदेशे संप्राप्तः । स्वीडनदेशस्य स्वीयायां द्विदिवसीययात्रायां श्रीमोदी अद्य स्वीडिश-प्रधानमन्त्रिणा उल्फ क्रिस्टर्सनेन सह द्विपक्षीयवार्तां करिष्यति तथा द्विपक्षीयसम्बन्धानां सर्वेषां पक्षाणां समीक्षा अपि करिष्यति। उभयोः पक्षयोः व्यापारः, हरितपरिवर्तनम्, कृत्रिमबुद्धिमत्ता, स्टार्टअप्स्, सुदृढ-आपूर्तिश्रृङ्खलाः, रक्षा, अन्तरिक्षम्, जलवायुपरिवर्तनम्, जनसम्बन्धाश्च इत्यादिषु सहयोगस्य नूतनान् मार्गान् अन्वेष्टुं अपेक्षा वर्तते।

उभौ प्रधानमन्त्रिणौ उर्सुला फॉन डेर लेयेन इत्यनया यूरोपीय-आयोगस्य अध्यक्षा सह मिलित्वा यूरोपीय-उद्योग-गोलमेज-सम्मेलनम् अपि सम्बोधयिष्यतः, यत् प्रमुखम् अखिल-यूरोपीय-व्यापार-मञ्चम् अस्ति।

स्वस्य द्विदिवसीयायाः -नीदरलैण्डदेशस्य -यात्रायां प्रधानमन्त्री मोदी स्वस्य डच-समकक्षीयेन सह द्विपक्षीयवार्तां कृतवान्। उभौ देशौ रक्षा-महत्त्वपूर्णखनिज तथा अन्येषु प्रमुखक्षेत्रेषु सहयोगं सुदृढीकर्तुं सप्तदश-संधि पत्राणि हस्ताक्षरितवन्तौ। उभौ नेतारौ पश्चिम-एशियादेशस्य स्थितेः तथा वैश्विक-ऊर्जा-आपूर्ति-व्यापारस्य उपरि तस्य प्रभावस्य विषये गभीरां चिन्तां प्रकटितवन्तौ।

सामाजिक-अंतर्जालीय-पटले लिखिते संदेशे श्रीमोदी उक्तवान् यत् नीदरलैण्डदेशस्य तस्य यात्रा द्विपक्षीयसम्बन्धान् नूतन स्तरे नेष्यति ।

### प्रधानमन्त्री-मन की बात

प्रधानमन्त्री नरेन्द्रमोदी मईमासस्य एकत्रिंशद्दिनाङ्के आकाशवाण्याः मन की बात इति कार्यक्रमे देशविदेशस्थ-जनैस्सह विचार-विनिमयं करिष्यति। इदं हि मासिकस्य रेडियोकार्यक्रमस्य चतुस्त्रिंशोत्तरैकशततमं संस्करणं भविष्यति । जनाः नमो ऐप इति चलदूरभाषीयतन्त्रांशे MyGov Open Forum इत्यत्र अथ च 1800-11-7800 अनेन दूरभाषसंख्या-माध्यमेन च कार्यक्रमस्य विषये स्वीयप्रतिक्रियां दातुं शक्नुवन्ति। आगामिसंस्करणाय परामर्शाः अस्य मासस्य एकोनत्रिंशत्-दिनाङ्कपर्यन्तं स्वीकृताः भविष्यन्ति।

## भारत-होर्मुज

होर्मुज-जलसंध्यां वाणिज्यिक-नौकासु कृतं होर्मुज-आक्रमणम् 'अस्वीकार्यं' इति कथयन् संयुक्तराष्ट्रसंघे भारतस्य स्थायी-प्रतिनिधिः पर्वथनेनी हरीश: उक्तवान् यत् नागरिक-नौकाचालकानां लक्ष्यीकरणं तथा नौवहन-स्वातन्त्र्यस्य बाधा केनापि प्रकारेण न्यायोचितं न भवितुमर्हति। सः वैश्विक-ऊर्जा-आपूर्ति-प्रवाहस्य सुरक्षाविषये संयुक्तराष्ट्रस्य आर्थिक-सामाजिक-परिषदः विशेष-सभायां भाषणं कुर्वन् आसीत्। श्रीहरीशस्य एषा टिप्पणी ओमान-तटस्य समीपे भारतीय-ध्वजयुक्तायां वाणिज्यिक-नौकायां जातस्य आक्रमणस्य कतिपय-दिनानन्तरम् आगता।

## अमितशाह-अहमदाबाद

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः, ए. आई. तथा डीप्-टेक् इत्येतौ भविष्यस्य अर्थव्यवस्थायाः मुख्यस्तम्भौ इति वर्णितवान्। अद्य गुजरातस्य अहमदाबाद्-नगरे 'मिलियन् माइंड्स टेक् पार्क्-फेज्-1' तथा 'ग्रेमी सिटी कैम्पस्' इत्येतयोः उद्घाटनं कुर्वन् सः अवदत् यत् भारतं विश्वस्य प्रत्येकस्मिन् उदयोन्मुखक्षेत्रे अग्रणी अभवत्।

## विराम

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

## प्रल्हाद जोशी

केन्द्रीय नवीकरणीय ऊर्जा-मन्त्री प्रल्हाद जोशी अवदत् यत् भारतदेशेन एकस्मिन् एव दिने २५६.४ गीगावाट-परिमिता अभिलेखीय -उच्च-विद्युत्-आवश्यकता सफलतया पूरिता। एकस्मिन् निजी-आङ्ग्ल-समाचारपत्रेण सह वार्तालापे श्रीजोशी महोदयः उक्तवान् यत् विद्युत्-आवश्यकतायाः प्रायः ३३ प्रतिशतं नवीकरणीय-ऊर्जा-स्रोतैः पूरितम्।

तेन उक्तं यत् भारतस्य विद्युत्-संरचना अधुना अधिका सुदृढा भविष्याय च सज्जा अस्ति।

मन्त्री अग्रे अपि उक्तवान् यत् एतत् परिवर्तनं ऊर्जा-क्षमतायाः तीव्र-विस्तारं, वैद्युतिकीय सुदृढीकरणं, तथा च राष्ट्रस्य विकास-पथे स्वच्छ-ऊर्जायाः वर्धमानं योगदानं प्रदर्शयति।

## त्रिवेन्द्रम् -अग्निकांड

त्रिवेन्द्रम्-न्यूदिल्ली-राजधानी-एक्सप्रेस-रेलयानस्य पृष्ठभागे जातस्य अग्नि-काण्डस्य उच्च-स्तरीयान्वेषणस्य आदेशः रेलमन्त्रालयेन प्रदत्तम्। अद्य प्रातः प्रायः सपाद पञ्चवादने, कोटा-सम्भागस्य नागडा-क्षेत्रस्य समीपे त्रिवेन्द्रम्-न्यूदिल्ली-राजधानी इत्यत्र एकः गार्ड्-कोचः, एकः ए. सी.-3 टियर् इत्येतयोः द्वयोः अग्निप्रकोपः अभवत्। मन्त्रालयः अवदत् यत्, कोच-मध्ये सुरक्षा-व्यवस्थया तत्क्षणमेव कार्यं कृतम्, रेलयानं च स्वयमेव स्थगितम्। रेल-चालकदलेन तत्क्षणमेव प्रभावितौ उभौ कोचौ पृथक् कृतम्, तथा च अस्यां घटनायां यात्रिणः क्षतेः कापि सूचना न अस्ति।

## विश्व स्वास्थ्य संगठन

विश्व स्वास्थ्य संगठनेन इबोला-महामार्याः घोषणा कृता। कांगो लोकतांत्रिक गणराज्य तथा युगांडा देशयोः प्रसृतं कोरोना-विषाणोः प्रकोपं अन्तर्राष्ट्रीयस्तरे सार्वजनिक-स्वास्थ्य-आपत्कालरूपेण घोषितम् अस्ति।

विश्व स्वास्थ्य संगठनस्य महानिदेशकः टेड्रोस अधानोम घेब्रेयसस इत्यनेन त्रिशताधिक-सन्दिग्ध-प्रकरणानां तथा अष्टाशीतिः मृत्यूनां विवरणानन्तरं एषः निर्णयः प्रदत्त:। डब्ल्यूएचओ संस्थया सामाजिक-माध्यमेषु प्रकाशिते संदेशे स्पष्टतया उक्तम् यत् अयं प्रकोपः कोविड्-१९ इव वैश्विक-महामारी-आपत्कालस्य श्रेण्यां न आगच्छति, तथा च अन्तर्राष्ट्रीय-सीमाः न निरोद्धव्याः इति परामर्शः अपि दत्तः। स्वास्थ्य-अधिकारिभिः उक्तम् यत् अयं प्रकोपः इबोला-विषाणोः दुर्लभेन बंडीबुग्यो-प्रभेदेन सम्बद्धः अस्ति, यस्य कृते अधुना किमपि स्वीकृतं उपचारः वा उपलब्धः नास्ति। इबोला-रोगः शरीर-द्रव-संस्पर्शेन प्रसारं करोति तथा च गम्भीरां प्रायः प्राणघातिनीं च व्याधिं जनयितुं शक्नोति।

**बैड्मिण्टन्**

बैड्मिण्टन्-क्रीडायां भारतस्य श्रेयांशी वालिशेट्टी इत्येषा बावोजी-चाईना-मास्टर्स्- स्पर्धायां महिला-एकल-क्रीडायां रजतपदकं विजितवती।

**नेपाल-पर्वतारोही**

अद्य नेपालदेशीया पर्वतारोही कामी रीता शेरपा इत्येषा द्वात्रिंशत्-वारं माउण्ट् एवरेस्ट्-शिखरम् आरुह्य इतिहासः विरचितवती। षट्पञ्चाशत्-वर्षीया एषा पर्वतारोही विश्वस्य उच्चतम-शिखरम् सर्वाधिकवारम् आरोहणस्य स्वकीयमेव कीर्तिमानं पुनः आरेखितवती।

**॥ इति वार्ता: ॥**